भीष्मः सर्व्वगुणैर्युक्तो ब्रह्मवेदार्थपारगः ।
शान्तनोः सत्यवत्याञ्च द्वौ पुत्त्रौ संबभूवतुः ॥
चित्राङ्गदन्तु गन्धर्व्वः पुत्त्रं चित्ररथोऽवधीत् ।
अन्यो विचित्रवीर्य्योऽभूत् काशिराजसुतापतिः ॥
विचित्रवीर्य्ये स्वर्याते व्यासात्तत्क्षेत्रतोऽभवत् ।
धृतराष्ट्रोऽम्बिकापुत्त्रः पाण्डुरम्बालिकासुतः ॥
भुजिष्यायान्तु विदुरो गान्धार्य्यां धृतराष्ट्रतः ।
दुर्य्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याञ्च माद्र्याञ्च पञ्च पुत्त्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्ज्जुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ॥
कुरुपाण्डवयोर्व्वैरं दैवयोगाद्बभूव ह ।
दुर्य्योधनेन वीरेण पाण्डवाः समुपद्रुताः ।
दग्धा जतुगृहे वीरास्ते मुक्ताः सुधियामलाः ॥
ततस्त एकचक्रायां ब्राह्मणस्य निवेशने ।
विप्रवेशा महात्मानो निहत्य वकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्य्यशुल्कां तां पाण्डवा उपयेमिरे ॥
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्ता इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा यतव्रताः ।
अर्ज्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ॥
वासुदेवस्य भगिनीं मित्रं देवकिनन्दनम् ॥
गाण्डीवं नाम तद्दिव्यं त्रिषु लोकेषु विश्रुतम् ।
अक्षयान् शायकांश्चैव तथाभेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
कृष्णद्वितीयो वीभत्सुरतर्पयत वीर्य्यवान् ॥
नृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे नीतिविदे मुदा ॥
युधिष्ठिरोऽपि धर्म्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्य्योधनेनैव मायाद्यूतेन पापिना ।
कर्णदुःशासनमते स्थितेन शकुनेर्मते ।
अथ द्वादशवर्षाणि वने तेपुर्म्महत्तपः ॥
सधौम्या द्रौपदीसत्या मुनिवृन्दाभिसंवृताः ।
ययुर्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महाप्राज्ञा गोग्रहादिमपालयन् ।
ततो ज्ञाताः स्वकं राष्ट्रं प्रार्थयामासुराहताः ॥
पञ्च ग्रामानर्द्धराज्यं वीरा दुर्य्योधनं नृपम् ।
नाप्तवन्तः कुरुक्षेत्रे युद्धञ्चक्रुर्बलान्विताः ॥
अक्षौहिणीभिर्दिव्याभिः सप्तभिः परिवारिताः ।
एकादशभिरुद्युक्तास्तेऽपि दुर्य्योधनादयः ॥
आसीद्युद्धं स्वर्गमार्गं देवासुररणोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्य्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
शस्त्राशस्त्रैर्म्महाघोरं दशरात्रं शराशनिः ॥
शिखण्ड्यर्ज्जुनवाणैश्च भीष्मः शरशतैश्चितः ।
उत्तरायणमीक्ष्याथ ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्म्मान् बहून् वर्षांस्तर्पयित्वा पितॄन्
बहून् ।
आनन्दे तु पदे लीनो विमले मुक्तकिल्बिषे ॥
ततो द्रोणो ययौ योद्धुं धृष्टद्युम्नेन वीर्य्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ॥
य एते पृथिवीपाला हताः पार्थास्त्रसागरे ।
शोकमासाद्य पुत्त्रेण द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्ज्जुनेन महात्मना ।
दिनद्वयं महद्युद्धं कृत्वा पार्थास्त्रसागरे ॥
निमग्नः सूर्य्यलोकन्तु ततः प्राप स वीर्य्यवान् ।
ततः शल्यो ययौ योद्धुं धर्म्मराजेन धीमता ॥
दिनार्द्धेन हतः शल्यो बाणैर्ज्ज्वलनसन्निभैः ।
दुर्य्योधनोऽथ वेगेन गदामादाय वीर्य्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्य्येण पितुर्व्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्य्यवान् ।
द्रौपद्यां रोदमानायामश्वत्थाम्नः शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जग्राहार्ज्जुन उत्तमम् ॥
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकसङ्कुलम् ।
स्नात्वा सन्तर्प्य देवांश्च पितॄनथ पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोन्महत् ॥
विष्णुमीजेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परिक्षितं स्थाप्य यादवानां विनाशनम् ॥
श्रुत्वा तु मौषले राजा जप्त्वा नामसहस्रकम् ।
विष्णोः स्वग जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥”
इति गारुडे १५० अध्यायः ॥*॥
वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतनवमवर्षः । तद्विवरणं यथा,—
“उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ॥
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्य्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते ॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ॥
ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिमुखाद्याश्च पारिपात्रोद्भवा मुने ! ॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्यविनिःसृताः ।
तापी पयोष्णी निर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥
ऋषिकुल्या कुमार्य्याद्याः शुक्तिमत्पादसम्भवाः ।
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ॥
तास्विमे कुरुपाञ्चालमध्यदेशादयो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च कृत्-
स्नशः ।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्व्वुदाः ॥
मारुका मालवाश्चैव पारिपात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः शाकल-
वासिनः ॥
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
समीपतो महाभाग ! हृष्टपुष्टजनाकुलाः ।
चत्वारि भारते वर्षे युगान्यत्र महामुने ! ॥
कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ।
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञपतिर्व्विष्णुरन्यद्वीपेषु चान्यथा ।
तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ॥
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ।
कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयात् ॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति ॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥

नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया ।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्व्वहिः ॥”
इति श्रीविष्णुपुराणे २ अंशे ३ अध्यायः ॥*॥
अस्मिन् वर्षे जन्मकारणं तत्साफल्यञ्च यथा,—
“शतजन्मतपः कृत्वा जन्मेदं भारते लभेत् ।
करोति सफलं जन्म श्रुत्वा हरिकथामृतम् ॥
अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म कृत्वैतानि च भारते ॥”*॥
अस्य पुण्यस्थलत्वं कर्म्मभूमित्वं परिमाणञ्च यथा,—
“कर्म्मणां फलभोगश्च सर्व्वेषां सुरसुन्दरि ! ।
नैव स्वर्गे न पाताले नान्यद्वीपे श्रुतौ श्रुतम् ॥
कृत्वा शुभाशुभं कर्म्म पुण्यक्षेत्रे च भारते ।
अन्यत्र तत्फलं भुङ्क्ते कर्म्मी कर्म्मनिबन्धनात् ॥